अव्यवहृतः, त्रि, (न व्यवहृतः। नञ्तत्पुरुषः।) अकृतव्यवहारः। इति नञ्समासनिष्पन्नः॥

अव्याजः, पुं, (न व्याजः। नञ्तत्पुरुषः।) छलाभावः। यथा।

"इदं किलाव्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति"॥

इत्यभिज्ञानशकुन्तलानाटके प्रथमोऽङ्कः। शीघ्रं। यथा। "सेक्तव्यो यदि मारवस्तरुरयं पाथोदपाथोलवैरव्याजं परिषिञ्च किं चिरयसे कालः परिक्रामति। मूले सिक्तरसे दले विगलिते शीर्णे तथा वल्कले न स्यादस्य परिस्थितेः प्रभुरहो धारापि धारा तव॥" इत्युद्भटः॥

अव्याप्यं, त्रि, (न व्याप्यं। नञ्तत्पुरुषः।) अव्यापनीयं। व्याप्तिरहितं। अनधीनं। यथा। "नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया साध्यव्याप्यव्यापकत्वेनोपाधेरेव साध्यव्यापकत्वसाधनात्। तस्मादुपाधिर्हेत्वाभासान्तरमिति"। इत्युपाधिवादचिन्तामणिः। अपि च,

"अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते"।
इति भाषापरिच्छेदः॥

अव्याप्यवृत्तिः, त्रि, (अव्याप्य सर्व्वावच्छेदमप्राप्य वृत्तिर्यस्य।) किञ्चिदवच्छिन्नवृत्तिः।

("अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते"।
इति भाषापरिच्छेदः।)

स्वसमानाधिकरणाभावप्रतियोगीति यावत्। दैशिककालिकभेदेन स द्विविधः। तत्पर्य्यायः। प्रादेशिकः २। आत्मनो विशेषगुणाः। बुद्धिः १ सुखं २ दुःखं ३ इच्छा ४ द्वेषः ५ यत्नः ६ धर्म्मः ७ अधर्म्मः ८ भावनाख्यसंस्कारः ९ आकाशस्य विशेषगुणः शब्दः १०। सामान्यगुणौ संयोग ११ विभागश्च १२। एते सर्व्वे अव्याप्यवृत्तयः स्युः। इति न्यायभाषा।

अव्याहतं, त्रि, (न व्याहतम्। नञ्तत्पुरुषः।) व्याघातशून्यं। यथा।

"यस्य त्रिकालममलं ज्ञानमव्याहतं सदा।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति"॥
इति शब्दमाला॥ किञ्च। विष्णुपुराणम्।
"अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च।
भवत्वेतत् परिणतौ ममास्त्वव्याहतं सुखम्॥
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं पुष्टिकरञ्चास्तु ममास्त्वव्याहतं सुखम्"॥

इत्याह्निकाचारतत्त्वम्॥ (अकुण्ठितं। यथा,—
"वेदशास्त्रार्थविज्ञाने येषामव्याहता मतिः"।
इति मार्कण्डेयपुराणे।)

अव्याहृतः, त्रि, अकथितः। न व्याहृतः अव्याहृतः नञ्समासनिष्पन्नः॥

अश ऊ ङ न (स्वादिं-आत्मं-सकं-वेट्।) व्याप्तिसंहत्योः। ऊ ङ अशिष्यते अष्टते। न अश्नोति। संहतिः समूहः। इति दुर्गादासः॥
("यद्ददाति गयास्थश्च सर्व्वमानन्त्यमश्नुते"। इति याज्ञवल्क्यसंहिता।)

अश श (क्र्यादिं-परं-सकं-सेट्।) भोजने। अश्नात्यन्नं बुभुक्षितः। इति दुर्गादासः।

अशकुम्भी, स्त्री, (अशा सलिलं स्कुम्भाति आप्नोति इति। अशा + स्कुम्भ + ट + पृषोदरादित्वात्।) पानीयपृष्ठजः। इति रत्नमाला॥ पाना इति भाषा।

अशक्यं, त्रि, (न शक्यम्। नञ्तत्पुरुषः।) अशक्यनीयं। असाध्यं। यथा। "अशक्ये अध्यवसायः समर्थना"। इति मुग्धबोधव्याकरणम्॥

अशक्तः, त्रि, (न शक्तः। नञ्तत्पुरुषः।) शक्तिरहितं। असमर्थं यथा। मनुः।

"बिभृयाद्दिच्छतः सर्व्वान् ज्येष्ठो भ्राता यथा पिता।
भ्राताशक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिः"॥
इति दायतत्त्वम्॥
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते"।
इति तिथ्यादितत्त्वम्॥

अशत्रुः, पुं, (न + शद् + क्रुन्। नञ्तत्पुरुषः।) चन्द्रः। इति शब्दचन्द्रिका॥ शत्रुरहिते मित्रे च त्रि॥

अशनं, क्ली, (अश + ल्युट्।) भक्षणं। अन्नं। इति हेमचन्द्रः॥ ("शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः॥" इति नागानन्दे॥

"विशिष्टमिष्टसंस्कारैः पथ्यैरिष्टै रसादिभिः।
मनोज्ञं शुचि नात्युष्णं प्रत्यग्रमशनं हितं"॥
इति सुश्रुतः॥)

अशनः, पुं, असनवृक्षः। पीतशालवृक्षः। इति रायमुकुटः॥ (असनशब्देऽस्य विशेषो ज्ञातव्यः॥)

अशनपर्णी, स्त्री, (अशनस्य शालवृक्षविशेषस्य पर्णमिव पर्णमस्याः।) वृक्षविशेषः। तत्पर्य्यायः। वातकः २ शीतलः ३ शीतलवातकः ४ असनपर्णी ५ शनपर्णी ६ सनपर्णी ७ शीतः ८ शीतकः ९ अपराजिता १०। माराटी इति ख्याता। इति शब्दरत्नावली॥

अशनाया, स्त्री, (अशन + क्यच्।) भोजनेच्छा। क्षुधा। इत्यमरः॥

("अन्नादा अशनाया निवर्त्तते पानात्पिपासा"। इति शतपथब्राह्मणे। "क्षुताशनायः फलवद्भिभूत्या"। इति भट्टौ।)

अशनायितं, त्रि, (अशनाय + क्त। अशनाया भोजनेच्छा जाता अस्य इति इतच् वा।) क्षुधितं। इत्यमरः॥

अशनिः, पुं, स्त्री, (अश्नाति सङ्घातं करोति। अश + अनिः।) वज्रं। इत्यमरः। विद्युत्॥ ("अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा" इति रघुवंशे।)

अशर्म्म [न्,] क्ली, (न शर्म्म। नञ्समासः। नास्ति शर्म्म यस्मिन् इति समासे वाच्यलिङ्गः।) कष्टं। दुःखं।

("एकौघभूतं तदशर्म्म कृष्णां
विभावरीं ध्वान्तमिव प्रपेदे॥"
इति भारविः॥) तद्विशिष्टे त्रि। इति जटाधरः॥

अशाखा, स्त्री, (नास्ति शाखा यस्याः।) स्थूलीतृणं। इति राजनिर्घण्टः॥

अशितं, त्रि, (अश + क्त।) भुक्तं। खादितं। दृप्तं। इति हेमचन्द्रः॥

("आप एव तदशितं नयन्ते"।
"तेजोऽशितं त्रेधा विधीयते"।
इति च छान्दोग्ये उपनिषदि॥
"अशितं मात्रया काले पथ्यं याति जरां सुखं"॥
इति वाभटः॥ "यावद् यस्याशनमशितमनुपहत्य प्रकृतिं यथाकालं जरां गच्छति, तावदस्य मात्रा प्रमाणं वेदितव्यं भवति"॥ इति चरकस्य॥)

अशितङ्गवीनं, त्रि, (अशिता भोजिता गावो यत्र। अशितगो + ख + निपातनात् मुमागमः।) आशितङ्गवीनं। पूर्व्वंगवादिचरितक्षेत्रादि। इत्यमरटीकासारसुन्दरी॥

अशित्रः, त्रि, (अश + इत्र।) चौरः। इत्युणादिकोषः॥ (चरुः।)

अशिरं, क्ली, (अश + इर।) हीरकं। इति राजनिर्घण्टः॥ (हीरकशब्देऽस्य विशेषो ज्ञेयः॥)

अशिरः, पुं, (अश भोजने + इर।) अग्निः। राक्षसः। सूर्य्यः। इति मेदिनी॥

अशिरा, स्त्री, अशिरराक्षसस्त्री। इत्युणादिकोषः॥

अशिश्विका, स्त्री, (अशिश्वी + स्वार्थे कन्।) अनपत्या। कन्यापुत्त्रविहीना स्त्री। इति शब्दरत्नावली॥ आँटकुड़ी इति भाषा॥

अशिश्वी, स्त्री, (नास्ति शिशुर्यस्याः इति। निपातनात् ङीप्।) अशिश्विका। इत्यमरः॥

अशिक्षितं, त्रि, (न शिक्षितं। नञ्समासः।) शिक्षारहितः। अनिपुणः। अनभिज्ञः। यथा। "यत्र सारथेरकौशल्यात् यानमन्यथा गच्छति तत्र हिंसायां अशिक्षितसारथिनियोगात् स्वामी द्विशतं दण्डं दाप्यः स्यात्"। इति कुल्लूकभट्टव्याख्यानात्। इति प्रायश्चित्ततत्त्वं॥

अशीतः, त्रि, (न शीतः। नञ्तत्पुरुषः।) शीताभावयुक्तः। यथा,—

"अशीतास्तरवो माघे फाल्गुने पशुपक्षिणौ।
चैत्रे जलचराः सर्व्वे वैशाखे नरवानरौ"॥
इति पुराणं॥

अशीतिः, त्रि, (अष्टदशतः परिमाणमस्य। पङ्क्तिविंशतीत्यादिना निपातनात् प्रकृतेरशीभावस्तिप्रत्ययश्च।) संख्याविशेषः। ८० आशी इति भाषा। यथा मनुः,—

"अशीतिभागं गृह्णीयात्
मासात् वार्द्धुषिकः शतात्।
द्विकं शतं वा गृह्णीयात्
सतां धर्म्ममनुस्मरन्"॥

इत्याह्निकाचारतत्त्वं॥ अपि च।
"अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोड़शः।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव च"॥
इति प्रायश्चित्ततत्त्वं॥

अशुद्धं, त्रि, (न शुद्धम्। नञ्तत्पुरुषः।) अपवित्रं। अकृतशोधनं। अशौचयुक्तं। यथा। शङ्खः,—